# श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्
## **शास्त्रीकक्षा षष्ठसत्रम्,** बाह्यछात्रेभ्य: स्वाध्यायकार्यम्

**विषय: वास्तुशास्त्र** **प्रश्नपत्रम्-६** **कुल गुणा:** 30

**C C 3.6.12**

**संदर्भग्रंथ: मनुष्यालयचन्द्रिका**

**युनिट –१**

प्रश्न –१ (अ) वास्तुकर्मणे भूपरीक्षापरिग्रहः ग्रन्थाधारे स्पष्टयत। ०५

(ब) निम्नलिखितानां श्लोकानां सप्रसङ्गं व्याख्यां कुरुत। ०५

(१) विना स्थापत्यादिचतुष्टयेन गृहादि कर्तुं न च शक्यतेऽस्मात्।
प्रसादितैस्तैरथ विप्रवर्यः सुसूक्ष्मधीः कारयतां गृहाणि।।

(२) सूत्रस्य रज्जोरपि चाग्रमूलैर्विद्धे गृहादिस्थितमध्यसूत्रे।
हीनायतिप्राङ्गणतश्चतुःशालागारतोऽन्यत्र भवन्ति दोषाः।।

(३) नन्दद्वन्द्वपुटेन वा वृतितया बाह्यादिमध्यान्मिता
वीथ्यः स्युः परितः पिशाचदिविषद्वित्ताधिभूदण्डिनाम्।
नागाम्ब्वग्निविनायकद्रुहिणनाम्नां चासु निन्द्याः स्मृताः
पैशाचाग्न्यहिदण्डिनां गृहविधौ वीथ्यश्चतुर्दिक्ष्वपि।।

(४) पूर्वस्यां वकुलो वटश्च शुभदोऽवाच्यां तथोदुम्बरश्चिञ्चा
चाम्बुपतौ तु पिप्पलतरुः सप्तच्छदोऽपि स्मृतः।
कौबेर्यां दिशि नागसञ्ज्ञिततरुः प्लक्षश्च संशोभनाः
प्राच्यादौ तु विशेषतः पनसपूगौ केरचूतौ क्रमात्।।

(५) प्रवासदा मध्यनता धरित्री मध्योन्नता वित्तसुखादिहन्त्री
वह्न्यादिवाय्वन्तनता धरित्री प्रायेण दारिद्र्यफलप्रदा स्यात्।।

## युनिट –२

प्रश्न –२ (अ) मानभेदेन आयव्ययादिनिर्णय: ग्रन्थाधारे वर्णयत। ०५

(ब) द्विशालभवनविधानं ग्रन्थाधारे दर्शयत। ०३

(ग ) निम्नलिखितानां श्लोकानां सप्रसङ्गं व्याख्यां कुरुत। ०२

(१) क्वचिच्चतु:शालगृहे समस्ते सर्वोत्तरानामपि मध्यसूत्रे।
नाहो विधेयो यदि मध्यप्ररूढमानं भवनं वदन्ति।।

(२) तालाद्यै: प्रतिमादिकं खलु यवैर्मेयं च भूषादिकं
वस्त्राप्रावरणांशुकादि परिमेयं स्याद् वितस्त्या तथा।
शस्त्राद्यं तदनामिकाङ्गुलियुगेनैवं च तद् व्यासतो मुष्ट्या
याज्ञिकभाजनादि यजमानस्यान्यदङ्ध्र्यादिना(म् ?)।।

## युनिट – ३

प्रश्न –३ (अ) स्तम्भादिगृहावयवनिर्माणविधानं ग्रन्थाधारे स्पष्टयत। ०५

(ब) निम्नलिखितानां श्लोकानां ससन्दर्भं व्याख्यां कुरुत। ०५

(१) राज्ञां धामनि भूसुरस्थितिगृहं नित्यार्चनायाङ्गणे
शर्वेन्द्राग्निजलेशदिक्षु कुलदैवार्चाप्रतिष्ठादि च।
प्रासादादिविधानमीशसुरनाथाग्न्यन्तकाशागतं
केतूत्थं वृषजं करोतु च निर्ऋत्यादौ क्रमोच्छ्रेयसे।।

(२) आयातचतुरश्रगृहे विकृतिलुपा वंशबद्धकूटगता:।
वंशस्थाग्रास्त्वन्या: प्रकृतिलुपा: कीलिता ह्याय:कीलै:।।

(३) पत्रोत्तरे चेद् वितताङ्ध्रिहीनतीव्रा विधेया खलु पोतिकेयम्।
खण्डोत्तरे तुल्यवितानतीव्रा सर्वाश्च सर्वेषु यथोपशोभनम्।।

(४) गेहाधिष्ठानोच्चतुल्यो रसाद्यष्टाङ्काशांशैरूनितौ वा यथेष्टम्।
मर्त्यागारस्योपपीठोच्छ्रय: स्यात् तत्तद्भागै: पादुकाद्यं विधेयम्।।

(५) प्रणवादिनमोन्तकेन नाम्ना विहितं स्वाम्बरमादरात्सुरेभ्य:।
प्रथमं विधिना त्वजाभि नत्वा बलिमात्रं विनिवेदयेत्तु तस्मै।।

*****